प्रवेश सं० २०९२९ विषयः धर्मशास्त्रम् क्रम सं०

नाम दानकमलाकरः ग्रन्थकार कमलाकरभट्टः

पत्र सं० २२४-२३७

श्लोक सं०

अक्षर सं० (पंक्तौ) ४५ पंक्ति सं० (पृष्ठे) १०

आकार: ९.२×३.७ लिपि: दे.ना. आधार: का.

वि० विवरणम् अपू.

पी० एस० यू० पा०—७७ एस० सी० ई०—१६५१—५० ००० 13719 न. ६३३१

Indira Gandhi National Centre for the Arts

ना२

सं.१९
प्र.५९
२२२

दुकांतेच घ्राणोकर्पूरचंदने॥ कर्पूरचंदनेच घ्राणोऽप्यथैः॥ कौंकुमानि च रोमाणि रोप्यनाडिच कारयेत्॥ कुंकुमं काश्मी
रजं॥ गारुत्मतशातेह्दपाने परिकल्पयेत्॥ मरकतं वेदं॥ तथान्यानि च रत्नानि स्वच्छायेत्सर्वसंधिषु॥ अन्याकुरुविंदादी
नि॥ कुर्याच्छर्करयाजिह्वां गोमयं च गुडात्मकं॥ गोमूत्रमाज्येन तत्स्यादधि दुग्धं स्वरूपतः॥ पुच्छाग्रे चामरं दद्यात्समीपे ताम्र
दोहनं॥ कुंडलानि च हैमानि भूषणानि च शक्तितः॥ कारयेदेवमेवं तु चतुर्थांशेन वत्सकं॥ एवं विरचनं कृत्वा तद्धोमाधि
वासनं तद्वत्तुलावत्॥ सुवर्णादिरचितां दत्वा धेनुमामंत्रयेत्ततः॥ अत्र रचितादान प्रतिष्ठापी॥ तेन पाठक्रमो हे
परत्तिहेमाद्रि॥ अधिवासनरचिता परमिति मदनरत्ने॥ अधिवासनरचिता तोपि भिन्नेयमात्रेयहेमदान च दिस
न्ये॥ गुडधेनुप्रदानसंग्रहं चोदाहरेत्ततः॥ मंत्रोग्रे॥ आमंत्र्यो त्यमभितः परिवत्समक्षचारयद्द्विजायगुरवेतुल
पूर्वकं तां॥ य पुण्यमाप्यस्तिन भवत्केतोपवासपापैर्विमुक्ततनुरेतिपदं मुरारेः॥ अत्र द्विजायैकस्मै कृत्वा सर्वा धेनुरेक
स्मै देया न विभज्यनेके॥ तदनुमत्सान्येभ्योपी भूपालरत्नाकरादयः॥ हेमाद्रिलक्ष्मीधरमदनरत्नादयस्त्वेकाग्निपरमे
कत्व॥ चतुर्वेदपक्षे तुलावत्॥ मित्रविषयत्वाद्धिरण्यकामधेनुवदित्याहुः॥ तद्धिकतोतद्देवाग्निविधाने पुन

चतु १४

Indira Gandhi National
Centre for the Arts

२२४ तेनान्यथा॥ अथात्रप्रयोगः॥ कर्त्ता देशकालौ संकीर्त्य सर्वपापक्षयमत्स्नसरूपत्वपूर्वकं बंधुवर्गपुत्रपौत्रादियुतवरवि
मानारोहणपूर्वकगोलोकप्राप्तिकामः शिवपदप्राप्तिकामो हरिपदप्राप्तिकामो वा श्वोरत्नधेनुमहादानं प्रतिपादयिष्ये
करिष्ये इति वा संकल्प्य तुलावत् होविंशादिपूजादि मंडपे गुर्वादिविनियोगांते वेद्यां षोडशारेक्ष्मात्तिनेलवणद्रोणाग्र
क्षुरवीनुदकतु पादाग्नु तेजतचतुर्गुणाकृतशुक्तिकर्णादधि दुग्धताम्रदोहनवस्त्रकृतवक्ष्यां रत्नमयीं गां प्राग्वन्निर्मी
येतिमदत्ता शुक्तिकर्णातास्येवेतिपुक्ता। ततो द्रोणामिताघादशधान्यनानाफलवासोमाल्यादीन्यासा घर्त्रा रत्नधेन
वे सवत्सायै नम इति प्रतिष्ठापूर्वं संपूज्य वितानं निवेद्य ग्रहपूजाबलिदानदक्षिणांते कृतोपवासाः सर्वे सवेषुः प्रातः पूर्णा
हुत्याद्यभिषेकांते कर्त्ता पुष्पांजलिः प्रदक्षिणीति पठेत्॥ या लक्ष्मीः सर्वदेवानां या च देवेषु वस्थिता॥ धेनुरूपे
णसादेवी मम शांतिं प्रयच्छतु। देवस्त्री [illegible]॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु
तु॥ विष्णोर्वक्षः स्थिता लक्ष्मीः स्वाहा या च विभावसोः॥ चंद्रार्कशक्रशक्तिर्या धेनुरूपास्तु सा श्रियै॥ चतुर्मु राम०
खस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च॥ लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे॥ स्वधा या पितृमुख्यानां स्वाहा य २२४
या चरुद्राणी शंकरस्य च या प्रिया॥ धेनुरूपेण या देवी मम पापं व्यपोहतु॥

ग्रं- ३०

त्रभुजां तथा॥ सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे॥ इति गुडधेनुमंत्रैः॥ त्वां सर्वदेवगणधामयतः पठंति रुद्रेंद्रचं
द्रकमलासनवासुदेवाः॥ तस्मात्समस्तभुवनत्रयदेवयुक्ता मां पाहि देवि भवसागरपीड्यमानमिति च पुष्पांजलिं क्षि
प्त्वा पश्चिमे देशकालावुक्त्वा पूर्वोक्तफलसंकीर्त्य मुकगोत्रायामुकशर्मणे गुर्वे लिंग्य इमां रत्नधेनुं सोपस्करां चतुर्था
शवत्सोपेतां मद्यादपाधान्याद्युपेतां पूर्वोक्तफलकामस्तुलादानोक्तभागव्यवस्थया संप्रददे न मम इति दद्यात्॥
ते च ओंस्वस्तीत्युक्त्वा देवस्य त्वेत्यादि रुद्राय गामित्यादिकामस्तुतिं पठेयुः॥ ततो दक्षिणा सुवर्णमानं रत्नादि शे
षं तुलावत्॥ ॥इति जगद्गुरुनारायणभट्टसूनुरामकृष्णभट्टसूनुकमलाकरभट्टकृते दानकमलाकरे रत्न
धेनुः॥ ॥अथ षोडशो महाभूतघटः॥ तत्र मात्स्ये॥ कारयेत्कांचनं कुंभं महारत्नान्वितं बुधः॥ तानि मा
णिक्यमुक्ताविद्रुममरकतपुष्परागहीरकेंद्रनीलगोमेदवैडूर्याणि नव॥ प्रादेशादंगुलश
तं यावत्कुर्यात्प्रमाणतः॥ अत्र हेममानानुक्तेर्यथाशक्तिमानमिति हेमाद्रिः॥ क्षीराज्यपूरि
तं तद्वत्कल्पवृक्षसमन्वितं॥ तेच गवेसमभागे॥ कल्पवृक्षः प्रागुक्तो मध्ये॥ पद्मासनगतांस्त

Indira Gandhi National Centre for the Arts

२२५ त्रंब्रह्मविस्णुमहेश्वरान्।।वराहेणोध्धृतंयद्वत्कल्पयेत्त्वंवसुंधरा।।ब्रह्मादयस्तत्त्वतो लाभा।।वराहश्रियौवौविश्ववक्त्रा
अत्रलोकपालान्महेंद्रादींश्चस्वस्ववाहनमास्थितानिति।।पूर्वार्धकेचित्पठंति।।वरुणाचासनगतेकांचनंमकरोपरि।।
हुताशनंमेषगतंवायुं रूपमृगोपरि।।तस्याकुशाक्षिपंकुर्यात्मूषकस्थंविनायकं।।विन्यसेत्करमध्येनान्वेरपंचक
संयुतान्।।लोकेषुप्रतिमास्तल्लोकाः।पूर्वमोवेदः।पुराणा।।तद्रूपंमान्से।।ऋग्वेदस्यासमस्त्रस्यायजुर्वेदस्यपंकजं
।।सामवेदस्यवीणास्यादृगुदक्षिणातोन्यसेत्।।अथर्ववेदस्यपुनःस्रुकस्रुवौकमध्वकरे।।वामेपद्ममितरान्यत्रा।।
पुराणावेदोवरदःसाक्षसूत्रकमंडलुःपरितःसर्वधान्यानिचामरासनदर्पणं।।पादुकोपानहछत्रंदीपिकाभूषणानि
च।।शय्याचजलकुंभीश्चपचवर्णवितानकं।।वेधांकुंभाःषोडशतुलावत्।।स्नात्वाधिवासनांतेतुमंत्रमेतमुदी
रयेत्।।अथप्रयोगः।।देशकालौसंकीर्त्यसकलपापक्षयपूर्वकपित्रादिसर्वबंधुसहितामरस्त्रीनिदेवमाना
र्कवर्णविमानकरणकविष्णुपदप्राप्तिकामःस्वोमहाभूतघटमहादानमहंप्रतिपादयिष्येकरिष्यइत्यकत्वातुलाव राम०
हुवादिनियोगांतेवेधांषोडशरेकुंकुंकुमसीरान्यदिशोपंचरत्नादिपुतेकल्मषप्रपंचमवेदांताःप्रतिमास्तदधोम २२५

घेनिधायाष्टादशधान्यादीनिषोडशकुंभांतानिपरितोनिधायग्रहादिततन्नामाभिसंपूज्यतुलावत्प्रातरभिषेकांतेकर्त्री
पुष्पांजलिमादायत्रिःप्रदक्षिणीकृत्योपतिष्ठेत्।।नमोवःसर्वदेवानामाधारेभ्यश्चसर्वदा।।महाभूतादिदेवेभ्यःशांतिरस्तु
शिवंममं।।यस्मान्नकिंचिदपस्तिमहाभूतैर्विनाकृतं।।ब्रह्मांडेसर्वभूतेषुतस्मात्क्षीरसयात्क्रमे।।इतिपुष्पांजलिंकृत्वा
नत्वाकुशयवतिलहस्तोदेशकालाद्युक्त्वाइमंसौवर्णमहाभूतघटमहारत्नहेमकल्पदक्षब्रह्मविष्णुशिववराहवरुणा
ग्निवायुविनायकरूपमृगःसाभाथर्ववरापुराणप्रतिमागर्भमष्टादशधान्यचामरासनदर्पणोपानहछत्रदीपिकाभूषणा
शय्याषोडशकुंभवितानाद्युपेतममस्यतुलोक्तफलप्राप्त्यवस्थयापूर्वोक्तफलकामोयुष्मभ्यममुकगोत्रामुकवेदामुक
शाखेभ्यःसंप्रददेनममेतितद्धस्तेषुजलंक्षिपेत्।।तेचओंस्वस्तिदेवस्यत्वेत्यादिअद्यैवहिरण्यंपतेनामतत्वमिसारिका
मस्तुतिपठेयु।।ततःप्रत्येकंसुवर्णदक्षिणा।।अत्रब्रह्मांडवद्दशधाविभागइतिभूपालः।।गुर्वादिभिन्नेभ्योपिदद्यात्स्वल्प
द्रव्यस्यैकाग्निविधानंचप्राग्वत्।।शेषंतुलावत्।। ।।इतिजगद्गुरुमहामहोपाध्यायरामेश्वरभट्टसूनुनारायणभट्टसू
नुरामकृष्णजदात्मजकमलाकरभट्टकृतेदानकमलाकरेषोडशमहादानानिसमाप्तानि।। ।। ।।७।।
।।अथपर्वतदानानि।हेमाद्रौ।।मेरोःप्रदानंवक्ष्यामिदशधामुनिसत्तम।।यत्प्रसादान्नरोलोकान्प्राप्नोतिसुरपूजितान्।।त

Indira Gandhi National Centre for the Arts

२२६ स्याद्विधानं वक्ष्यामि पर्वतानामनुत्तमं॥ प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः॥ गुडाचलस्तृतीयः स्याच्चतुर्थो हे-
मपर्वतः॥ पंचमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः॥ सप्तमो घृतशैलः स्याद्रत्नशैलस्तथाष्टमः॥ राजतो नवमस्तद्व-
द्दशमः शर्कराचलः॥ अयने विषुवे चैव व्यतीपाते दिनक्षये॥ शुक्लपक्षे तृतीयायामुपरागे शशिक्षये॥ विवाहोत्सवय-
ज्ञेषु द्वादश्यामथ वा पुनः॥ शुक्लायां पंचदश्यां वा पुण्यर्क्षे वा विशेषतः॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः॥
मंडपं कारयेद्भूपर्वते युतं॥ धान्यद्रोणसहस्रेण भवेन्निरिरिहोत्तमः॥ मध्यमः मध्यमः पंचशतिकः कनिष्ठः स्यात्त्रि-
भिः शतैः॥ भविष्योत्तरे॥ सार्धशतद्वयेनाप्युक्तः॥ द्वादशप्रसृतिः कुडवः॥ ते चतुर्गुणोत्तराः प्रस्थाढकद्रोणाः॥
इति कल्पतरुहेमाद्री॥ प्रागुक्तेषु शतेष्वपि विकल्प इति युक्तं॥ मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात्
॥महाव्रीहिः शालिः॥ भविष्योत्तरे तु व्रीहिभिः कारयेत्तं तु गोधूमैरथवा यवैरिति मेरो विकल्प उक्तः॥ मध्ये कल्प-
तरुः। दक्षिणे मंदारः। उत्तरे पारिजातः। इति वृक्षत्रयं। एवं हरिचंदनः पश्चिमे संतानद्रुमोपि ज्ञेयः॥ हरिचंदनसं- दान०
तानौ पूर्वपश्चिमभागयोः॥ निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले इति वक्ष्यमाणत्वात्॥ विशेषादित्युक्ते र २२६

न्यत्रानावश्यकत्वं। तेनात्र पंच वृक्षास्त्रयो वा॥ मध्ये मेरोर्मूर्ध्नि॥ पंचशाखत्वं सर्वत्र॥ पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गो-
मेदकपुष्परागैः पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैडूर्यसरोजरागैः॥ सरोजरागः पद्मरागः॥ गिरेर्वक्ष्यमाणा राजतचतुःशृंगेषु
विनिवेश्या नित्यर्थः॥ श्रीखंडखंडैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात्॥ ब्रह्मा च विष्णुर्भगवान् पुरारिर्दिवा-
करोऽप्यत्र हिरण्मयः स्यात्॥ मूर्धन्यवस्थानममत्सरेण कार्यास्त्वनेके च तथा द्विजौघाः। द्विजौघाः पक्षिसंघाः। ओघशब्दे-
न बहुत्वे सिद्धे बहुवचनं शृंगाण्यथ राजतानि नितंबभागोपि च राजतः स्यात्॥ आद्रेक्षुवंशावृतकंदरस्तु घृतोदकप्रस्र-
वणाश्च दिक्षु॥ घृतनिर्झरोदकमित्यर्थः॥ शुक्लाम्बराण्यंबुधरावली स्यात् पूर्वेण पीतानि च दक्षिणेन॥ वासांसि पश्चा-
दपि कर्बुराणि रक्तानि चैवोत्तरतो घनाली॥ रौप्यान्महेंद्रप्रमुखांस्तथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण॥ ते च तुव्या-
वत्॥ नानाफलाली च समंततः स्यान्मनोरमं माल्यविलेपनं च॥ वितानकं चोपरि पंचवर्णमम्लानपुष्पाभरणं सितं च॥ इ-
त्थं निवेश्यामरशैलमग्र्यं मेरोस्तु विष्कंभगिरीन् क्रमेण॥ तुरीयभागेन चतुर्दिशं तु संस्थापयेत्पुष्पविलेपनाद्यान्॥ ए-
केकं तु चतुर्थांशेन। चतुर्थांशेन विष्कंभपर्वतान् कारयेत् पृथगित्यग्रेऽभिधानात्॥ पूर्वे द्रुमांतरानुक्तेः व्रीहिभिरेवामरन

Indira Gandhi National Centre for the Arts

२२०

रत्नहेमाद्रिः। नन्न॥ विष्कंभपर्वतं चैवयथैवः कुर्यात्तु पूर्वतदति ब्रह्मांडपुराणोक्तविशेषोक्तेः। पूर्वेणामंदरमनेदारुक्षे व्व युक्तं युक्तं
गरोः कनकभद्रकदंबवितं॥ गरोमेरैः स्त्रिभि॥ हेमोभद्रं- कदंबवृक्षः। कामेन कांचनमयेन विराजमानमाकारयेचसुमव
स्त्रविलेपनाढ्यं॥ क्षीरारुणोदसरसा च वनेन चैवरौप्यराशार्क्षिघटितेन विराजमानं॥ काममाह विश्वकर्मा॥ चापबाणा
धरः कामोरतिप्रियास्तमध्यमः॥ आली ढोनरतोरागीरूपवान्विश्वमोहकः॥ शास्त्राचारुण्यतवृतेन क्षीरपूर्णेन रुणोद
संज्ञेनसरसा वनेन चयुतं॥ पा. मेन गंधमदनश्चनिवेशनी योगो धूम्रसंचयमयः कृत्वधौतनं॥ हेमजंबूवृक्षेण। हेमेनय
क्षपतिना घृतमानसेन वस्त्रे श्वराजत वनेन च संयुतः स्यात्॥ कुबेररूपं श्रीप्रश्ने॥ ऊर्ध्वमापिंगतेत्रं च गदिनं पीतविग्रहं॥
पुष्पकस्कंधनाध्यस्थं ध्यायेद्विवसरवंदेति। रौप्यं घृतपूर्णपानसंरं॥ पश्चात्तिलैर्विपुलमेकसुवर्णपुष्पं सौवर्णहि
रण्मयपिहंसयुक्तं॥ आकारयेद्रजतपुष्पवनेन तद्वत्स्वान्वितं दधिसितोदसिरस्यपाग्रे॥ तद्वद्धमादनवत्॥ विपुल्व
हेनामगिरिः। दधिपूर्णरूप्यपात्रं सितोदसंस्रसरः। संस्कार्प्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपिमाषमयं राम०
सवस्त्रं॥ पुष्पैश्च हेमवट पादपशोखरंतमाकारयेत्कनकधेनुविराजमानं॥ माक्षीकभद्रसरसा च वनेन तद्वद्रौप्येण भास्व २२१

रवताच युतं विधाय॥ मधुपूर्णभद्रार्थंसरः॥ कामादयश्चमूर्धस्थकदंबादिवृक्षाधोभेरोरभिमुखाः कार्याः॥ होमश्च
तुर्भिरथ तदपुराणाविद्भिर्द्रैतेरनिंघचरितैः कृतिभिर्द्विजेंद्रैः॥ पूर्वेणहस्तमितमत्र विधाय कुंडं कार्यस्तिलैर्यवघृतेन समि
त्कुशैश्च॥ रात्रौचलागरमनुद्धतगीततूर्यैरावाहनं च कथयामि शिलोच्चयानां॥ मंत्रास्तत्वग्रे वक्ष्यंते॥ अत्र हस्तकुंडोक्तेः स
हस्रेत्वयहोतव्ये कुर्यान्कुंडकरात्मकमित्युक्तेः सहस्रसंख्यः सर्वो होमः। तेन प्रत्येकं त्रयादशहुतयः इति दानविवेक हेमा
द्रौ॥ ब्रह्मांडपुराणे॥ त्वष्टोत्तरशतं प्रत्येकं होम उक्तः॥ अथ प्रयोग तः। कर्त्रोपवाससंकल्प्यकुशतिलयवजलहस्तो
देशकालौ संकीर्त्य सरोगंधर्वविराजमानदिव्यविमानकरणकस्वर्गगमनानंतरसामन्वंतरशतसमयावधिरवब्रह्म
लोकनिवासोत्तरभूलोकराजराजत्वप्राप्तिकामोहं श्वोधान्यपर्वतदानं करिष्ये प्रतिपादयिष्ये इति वा संकल्प्य गणेशपूजा
मातृपूजा वृद्धिश्राद्धपुण्याहवाचनानि कृत्वाचार्यं चतुरोऽन्यान्द्विजांश्च वृत्वा तुलावन्मधुपर्केणासंपूज्याष्टादशषोडश वा दि
हस्तं मंडपं तन्मध्ये पूर्वे हस्तमात्रे चतुरस्रं कुंडं तदैशाने हस्तमात्रं वेदिं च कृत्वा गोमयेनोपलिप्य मध्ये कुशोपरास्तीर्य सहस्रद्रोण
शालिभिस्तदर्धेन शतेन त्रयत्रैणवाशक्त्या मेरुं कुर्यात्॥ भूमावास्तीर्य तत्कैनात्रमध्ये वेदि॥ द्रोणाः प्रागुक्ताः। तदुपरि मध्ये

Indira Gandhi National
Centre for the Arts

११८ कल्पवृक्षंदक्षिणेमंदारमुत्तरेपश्चिमेसंतानंपूर्वेहरिचंदनमितिपंचहेमवृक्षान्नाधान्योपरिनैववास्थाप्य दिक्षुब्रह्मविष्णुरु
द्रसूर्यान्पक्षिराणोमुनीन्द्रस्थापयेत्। मेरोः प्रागादिषु रूप्यशिखरचतुष्टयमुक्ताहीरगोमेदपुष्परागमरकतनीलवैडूर्यप
मरागखचितंकृत्वात दुहिरण्यदिक्षुरागतलोकपालाः। अभितः श्रीखंडप्रवालमुक्तिनिर्मितंवेचरानंतमेखलमादि
क्षुश्वेतपीतकबुररक्तवस्त्रैर्वेष्टितमिक्षुदंडघृतक्षीरदधिक्षुघृतपूर्णरूप्यपात्रकल्पितमस्त्रवराणानानाफलमाल्य
पंचवर्णवितानयुतंमेरुंकुर्यात्। मेरोः पूर्वमेरुचतुर्थांशेनश्रीहिममयंमंदरंमूर्धस्थहेमनरश्चमूलस्वकामदेवंहैमंकदं
बवृक्षरोप्यक्षीरपूर्णमिरुणोदसरः रोप्यंनानाफलपुष्पवस्त्रयुतंचैत्ररथंवनंचकुर्यात्॥ दक्षिणेमेरुचतुर्थांशेनगो
धूमंगंधमादनंतन्मूर्ध्निहैमंजंबूवृक्षंतन्मूलेधनदेघृतपूर्णरूप्यपात्रेमानसंसरसुगंधवंवनंचप्राग्वत्कुर्यात्॥ पश्चिमेति
लैर्मेरुचतुर्थांशेनविपुलंगिरिंतन्मूर्ध्निहैमंपिप्पलंमूलेहैमंहंसरोप्यंदधिपात्रंसितोदंसरःरोप्यवैभ्राजंवनंचप्राग्वत्॥
उत्तरेमाषैर्मेरुचतुर्थांशेनसुपार्श्वगिरिंतत्रहैमंवटंमूलेसवत्सधेनुंमधुपूर्णरोप्यपात्रंभद्रसरःरोप्यसावित्रवनंचप्राग्व राम०
त्कुर्यात्॥ ब्रह्मांडेतु॥ सर्वेषांहैमशृंगाण्युक्तानि। ततोमंडपपूजादितुलावत्कुर्यात्। नियोगांतेकृतेगुरुःकुंडेशानेकुं ११८

भंसंस्थाप्यऋत्विग्भिः योगाद्यग्निस्थापनांतेग्रहादिस्थापनाद्यन्यभागांतेऋत्विजः ग्रहादिदेवविनायकादिपंचदशलोक
पालाष्टवसुएकादशरुद्रद्वादशादित्यब्रह्मविष्णुशिवसध्यकामदेवधनदहंसकामधेनुरूपेकाशीनिदेवेभ्यः प्रत्येकंप्रतिद्रव्यंत्र
योदशसंख्यायातन्मंत्रैर्नाममिर्वातिलयवौदुंबरसमित्कुशान्कृताक्तान्जुहुयुरिति। हेमाद्यादयः॥ घृतेनमित्रोहोमस्त
युक्तो ब्रह्मांडपुराणे॥ लक्षशांतहोमः प्रत्येकमुक्तः। एवंहोमंकृत्वास्विष्टकृदादिशेषंसमाप्यकर्त्तामेर्वादीनावाहयेत्॥ म
त्रास्तु॥ त्वंसर्वदेवगणधामनिधिर्विरुद्धमस्मद्गृहेष्वमरपर्वतनाशयाशु॥ क्षेमंविधत्स्वकुरुशांतिमनुत्तमांनःसंपूजि
तःपरमभक्तिमतामयाद्य॥ त्वमेवभगवानीशोब्रह्माविष्णुर्दिवाकरः॥ मूर्त्तामूर्त्तपरंबीजमतःपाहिसनातन॥ यस्मा
त्वंलोकपालानांविश्वमूर्त्तेश्चमंदिरं। रुद्रादित्यवसूनांचततःशांतिंप्रयच्छमे॥ यस्मादशून्यममरैर्नारीभिश्चशिरस्तव॥
तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥ ब्रह्मांडपुराणे॥ लक्ष्मेषिमंत्राः॥ अन्नंप्राणादिभूतानांबलंतेजस्तथैवच॥ जंग
माजंगमंसर्वंजगदन्नेप्रतिष्ठितं॥ अन्नाद्भवंतिभूतानिअन्नाद्वर्धंतिचेयहि॥ तस्माद्धान्याधिकारेणअन्नंबाहुविधंभवेत्॥ अतो
धान्यगतोमेरुः करोत्वभिमतंमम॥ नमस्तेसर्वलोकानामाधारसुरपूजित॥ वित्तहीनोममकुलेमाभवेदिहकश्चन॥ अविछि

Indira Gandhi National Centre for the Arts

२२८ त्वंतथैवान्नंममजन्मनिजन्मनि॥मायातुसंसयंचैववर्द्धमानमहर्निशं॥अथमंदारादीनां॥यस्माच्चैत्ररथेनेतमदाश्वे
नवनेनच॥शोभसेमंदरस्तीप्रमलंतुष्टिकरोभव॥यस्माच्चूडामणिर्जंबूद्वीपेत्वंगंधमादन॥गंधर्ववनशोभावानतः
कीर्त्तिर्दृढास्तुमे॥यस्मात्त्वंकेतुमालेनवैभ्राजेनवनेनच॥हिरण्मयश्चाश्वत्थशिरास्तस्मात्पुष्टिर्दृढास्तुमे॥उत्तरैःकु
रुभिर्यस्मात्सावित्रेणवनेनच॥सुपार्श्वराजसेनित्यमतःश्रीरक्षयास्तुमे॥ततोनाममंत्रैःषोडशोपचारैःसंपूज्यतत्रैवस
र्वैजागरणंकुर्युः॥ततःप्रातःपूर्णाहुत्यादिकृत्वाकुंडकलशोदकेरभिषिक्तोयजमानपुष्पांजलिंगृहीत्वात्रिःप्रद
क्षिणीकृत्योपतिष्ठेत॥अन्नंब्रह्मयतःप्रोक्तमन्नेप्राणाःप्रतिष्ठिताः॥अन्नाद्भवंतिभूतानिजगदन्नेनवर्त्तते॥
अन्नमेवयतोलक्ष्मीरन्नमेवजनार्दनः॥धान्यःपर्वतरूपेणपाहितस्मान्नमोनमः॥इतिपुष्पांजलिंप्रक्षिप्य॥नत्वा
प्राङ्मुखोदेशकालौसंकीर्त्यामुकगोत्रोमुकशर्माहममुकगोत्रायामुकप्रवरायामुकशाखाध्यायिनेमुकशर्मणे
गुरवेइमंतेप्परोगंधर्वत्वादिपूर्वोक्तफलमुद्दिश्यइममुकद्रोणव्रीहिकृतधान्यमेरुंहैममंदारादिवृक्षपंचकब्र राम• २२८
ह्मविष्णुशिवार्कप्रतिमायुतंमुक्तादियुतंरौप्यशृंगचतुष्कंइंद्रादिलोकपालरौप्यनिर्मितयुतमिक्षुकंदररौप्यपात्रस्थ

घृतोदकप्रस्रवणाम्बुक्रपीतकर्पूररक्तवस्त्रमेघावृतंनानाफलमाल्यवितानादियुतंतुभ्यंसंप्रददेनममेतिदद्यात्॥सव
त्रोस्तृतीक्षत्नादेवस्यत्वेत्यादिकामस्तुतिंपठेत्॥ततःपूर्वेतद्दानप्रतिष्ठार्थमिमाःअष्टौषट्वतस्रस्तिस्रवागीःएकांवा
गुरवेदक्षिणांसंप्रददेनममेतिदद्यात्॥ततोर्घ्यादिप्रागुक्तफलांतेइमंपूर्वस्थितंमंदाराख्यमेरुचतुर्थांशधान्यमयंवि
ष्कंभपर्वतंहैमकदंबकामदेवरौप्यक्षीरपूर्णारुणोदसरश्चैत्ररथवनवस्त्रादियुतममुकगोत्रायेत्यादितुभ्यमृत्विजे
संप्रददे॥प्राग्वद्दक्षिणा॥पुनरर्घ्यादि दे॥फलांतेइमंपश्चिमसंस्थंमेरुचतुर्थांशामुकद्रोणतिलमयंविपुलंविष्कं
भगिरिंहैमपिप्पलहंसयुतंसितोदसरोरूप्यरौप्यदधिपूर्णपात्ररौप्यवैभ्राजवनवस्त्रफलादियुतंतुभ्यमृत्विजेइत्यादि
प्राग्वत्॥पुनरर्घ्यादिफलांतेइममुत्तरस्थंमेरुचतुर्थांशामुकद्रोणमाषमयंसुपार्श्वाख्यंविष्कंभगिरिंहैमवटकामधे
नुयुतंभद्रसरस्थानीयरौप्यमधुपूर्णपात्ररौप्यसावित्रवनवस्त्रफलादियुतंतुभ्यमित्यादिप्राग्वत्॥लवणाचलादौ
धान्यपदेलवणपदंतत्फलादिज्ञेयं॥यद्वागुर्वीघनुक्तायामेभ्योपिविभ्योदद्यादितिमदनरत्ने॥तच्चिंत्यं॥ततोग्रहाणा
मुत्तरपूजांकृत्वाविसर्ज्योपस्करंगुरवेदत्वाविप्रान्संभोज्याक्षारालवणंभुंजीत॥एवंसर्वपर्वतेषुज्ञेयं॥मात्स्यपाद्मयोः॥

Indira Gandhi National Centre for the Arts

२२० एवमामंत्रतान्सर्वान्प्रभाते विमले पुनः॥ स्नात्वाथ गुरवे दद्यान्मध्यमं पर्वतोत्तमं॥ विष्कंभपर्वतान्दद्यादृत्विग्भ्यः क्रमशो
नृप॥ गाश्चद्द्याच्चतुर्विंशदथवा दश पार्थिव॥ शक्तितः सप्त वाष्टौ वा पंच दद्याच्छक्तिमान्॥ विभागस्तत्क्रमस्त्वेवं एका
वा गुरवे देया तत्कपिला च पयस्विनी॥ ऋत्विग्भ्योरक्षितादेया यथासंभविकांचनं॥ पर्वतानामशेषाणामेष एव विधि
:स्मृतः॥ त एव पूजने मंत्रास्त एवोपस्कराः स्मृताः॥ ग्रहाणां लोकपालानां ब्रह्मादीनां च सर्वशः॥ स्वमंत्रेणैव सर्वे
षु होमः शैलेषु पठ्यते॥ वस्त्रादीनां मंत्राभावान्नाम्नैव॥ उपवासी भवेन्नित्यमशक्तो नक्तमिष्यते॥ दानकाले तु ये मंत्राः
श्रृणु सर्वेषु यत्फलं॥ अस्यायेनन्नब्रह्मपत इत्यादि दानमंत्राः॥ अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिं॥ मन्वंत
रशतं साग्रं ब्रह्मलोके महीयत इत्यादि॥ इति धान्यपर्वतः॥ ॥ अथ लवणाचलः॥ पाद्मे॥ अथातः संप्र
वक्ष्यामि लवणाचलमुत्तमं॥ उत्तमः षोडशद्रोणाः कर्त्तव्यो लवणाचलः॥ मध्यमः स्यात्तदर्धेन चतुर्भिर
धमः स्मृतः॥ वित्तहीनो यथाशक्त्या द्रोणादूर्ध्वं तु कारयेत्॥ चतुर्थांशेन विष्कंभपर्वतान्कारयेत्पृथक्॥ ला राम॰
वणाः सर्वत्र॥ विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा॥ तद्वद्धेमतरून्सर्वान्लोकपालान्निवेशयेत्॥ सरो २२॰

सि कामदेवादीस्तद्वत्तत्र निवेशयेत्॥ दानमंत्रास्तु॥ सौभाग्यरससंभूतो यतोयं लवणो रसः॥ तदात्मकत्वेन च
मां पाहि पापान्नगोत्तम॥ यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं विना॥ प्रियं च शिवयोर्नित्यं तस्माच्छांतिं प्र
यच्छ मे॥ विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनं॥ तस्मात्पर्वतरूपेण पाहि संसारसागरात्॥ उमालोके वसेत्क
ल्पं ततो याति परां गतिं॥ सुरलोकप्राप्तिपूर्वककल्पावधि उमालोकनिवासोत्तरपरमगतिप्राप्तिकाम इति दा
नया। सोत्तरपरमगतिप्राप्तिकाम इति दानवाक्यं॥ अन्यत्प्राग्वत्॥ अथ गुडपर्वतः॥ पाद्मे॥ अथातः संप्रवक्ष्या
मि गुडपर्वतमुत्तमं॥ उत्तमो दशभिर्भारैर्मध्यमः पंचभिर्मतः॥ त्रिभिर्भारैः कनिष्ठः स्यात्तदर्धेनाल्पवित्तवान्॥ ब्रह्मा
उ तु विंशतिभार उत्तम उक्तः॥ भारस्तत्र तुलास्त्रिंशत्पलशतं भारः सार्द्धशततिलकला इति प्रागुक्तः॥ तद्वद्रामत्रयाप्ज्ञा
हेमवृक्षसुरार्चनं। विष्कंभपर्वतांस्तद्वत्सरांसि वनदेवताः॥ होमजागरणं तद्वल्लोकपालाधिवासनं॥ दानमंत्रास्तु॥ य
था देवेषु विश्वात्मा प्रवरोयं जनार्दनः॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां॥ प्रणवः सर्वमंत्राणां नारीणां पार्व
ती यथा॥ तथा रसायनां प्रवरः सदैवेक्षुरसो मतः॥ मम तस्मात्परां लक्ष्मीं ददस्व गुडपर्वत॥ यस्मात्सौभाग्यदायिन्या भ्राता

Indira Gandhi National
Centre for the Arts

२३ त्वं गुडपर्वत॥ निवासश्चापि पार्वत्यास्तस्मान्मां पाहि सर्वदा॥ अत्र ब्रह्मांडपुराणे विशेषः॥ सर्वपापहरं पुण्यं सौभाग्य
जननं परं॥ पुष्टिदं शांतिदं चैव सुखदं दिव्यभोगदं॥ हैमशृंगाणि। प्रवालकलशाः॥ कुर्यात्ताम्रमयं स्कंधं नानाधातुविभूषि
तं॥ कृत्वा तमीश्वरं शैलं सर्वधान्यसमावृतं॥ अष्टादशधान्यानि॥ सर्वौषधैः समोपेतं सशृंगं समहाद्रुमं॥ मुख्यादीनि सर्वौष
धानि प्रागुक्तानि॥ पूर्वं होमांते महाव्याहृतिभिश्चैव अयुतं तत्र होमयेत्॥ मंत्रस्तु॥ त्वं रसानां वरो नित्यं देवानां च सदा प्रियः॥
सुखं प्रयच्छ मे नित्यं नमस्ते पर्वतोत्तम॥ यावद्भूः सागरा नद्यो यावच्चंद्रार्कतारकाः॥ तावन्मे त्वं सुखं यच्छ सौभाग्यमतुलं तथा
॥ अत्र सर्वपापक्षयपुण्यसौभाग्यशांतिसुखदिव्यभोगगंधर्वपूजातं स्त्रीणां राजन्विशेषतः॥ अत्र सर्वपापक्षयपुण्य
(सौभाग्यशांतिसुखदिव्यभो- पूर्वककल्पशतावधि गौरीलोकवासोत्तरशत्रुपराजयपुरारोग्यपुत्रसप्तद्वीपा
धिपत्यकाम इति दानवाक्यं॥ अमृत प्राग्वत्॥ अथ सुवर्णाचलः॥ पाद्मे॥ अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमं॥ य
स्य प्रसादाद्भवनं वैरिंचिं याति मानवः॥ उत्तमः पलसाहस्रो मध्यमः पंचभिः शतैः॥ तदर्धेनाधमस्तद्वदल्पवित्तो राम०
पि शक्तितः॥ दद्यादेकपलादूर्ध्वं यथाशक्त्या विमत्सरः॥ धान्यपर्वतवत्सर्वं विदध्याद्राजसत्तम॥ दानमंत्रः॥ नमस्ते २३

ब्रह्मगर्भाय ब्रह्मबीजाय वै नमः॥ यस्मादनंतफलदस्तस्मात्पाहि शिलोच्चय॥ यस्मादग्नेरपत्यं त्वं यस्मात्तेजो जगत्पतेः॥ हे
मपर्वतरूपेण तस्मात्पाहि नगोत्तम॥ अनेन विधिना यस्तु दद्यात्कनकपर्वतं॥ स याति परमं स्थानं ब्रह्मानंदकारकं॥ तत्र कल्पश
ततिष्ठेत्ततो याति परां गतिं॥ अत्र सर्वपापक्षयप्राप्ति ब्रह्मलोकावासोत्तरपरमगतिकाम इति दानवाक्यं॥ अत्राल्पद्रव्ये गुर्वादिभ्यो
दानं॥ अत्राल्पे गुरुमात्राय। सहस्रपलादिबहुद्रव्ये तु बहुभ्यो दानदर्शनात्तादृशपात्रस्य दुर्लभत्वात् प्रकृतौ धान्यशैले भावे
पि तु व्यस्तग्रहप्रजादिधर्मवद्द्रव्यविभागोपि॥ एवं धान्यशैलेपि। तेनार्धतुर्यांशादि गुरवे दत्वान्येभ्योपि देयादिति मदनरत्ने हे
माद्रौ॥ तत्र॥ प्रकृतिविकाराभावान्नत्वेपि गुरवे मधुशैलं विति। वैकृतविशेषेणाबाधात्॥ बहुद्रव्यमेकस्मान्न देयमिति चेत्। त
वकाहानिः। तेन म्लानोक्तिरिष्टपेक्षा॥ अथ तिलशैलः॥ पाद्मे॥ अथातः संप्रवक्ष्यामि तिलशैलं विधानतः॥ यत्प्रसादाच
तोयाति विष्णुलोकमनुव्रतं॥ उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमो मतः॥ त्रिभिः कनिष्ठो राजेंद्र तिलशैलः प्रकीर्तितः॥ पूर्वव
च्चापरं सर्वं वृक्षविष्कंभकादिकं॥ ब्रह्मांडे तु शतं तत्र येषां द्रोणानां शक्त्या वापि प्रकल्पयेत्॥ ब्रह्मादिलोकपालांश्च सौ
वर्णान् कारयेत्तथा॥ पूजामंत्रस्तु॥ विष्णुदेहसमुद्भूते तिलैस्त्वं कारितो मया॥ देवालय महामेरो नमस्ते भूभृतां वर॥ सप्तज

Indira Gandhi National Centre for the Arts

२३१ न्मा निध त्किंचिन्मपापमनुषितं॥ स्वयंभुवा तु तत्सर्वं तस्य सादान्नगोत्तमे तत्फलं॥ दानमंत्रान्प्रवक्ष्यामि यथावन्मुनिपुंगवा॥
यस्मान्मधुवने विसोदेहस्वेदसमुद्भवाः॥ तिलाः कुशाश्च माषाश्च तस्माच्छंनो भवं त्विह॥ हव्यकव्येषु यस्मा च्चति लैरेवामि
रक्षणं॥ भवादुद्धर शैलेंद्र तिलाचल नमोस्तु ते॥ इत्यामंत्र्य च योदद्यात्तिलाचलमनुत्तमं॥ स वैष्णवं पदं याति पुनरावृत्तिदुर्ल
भं॥ दीर्घायुष्यमवाप्नोति पुत्रपौत्रांश्च मानवः॥ पितृभिर्देवगंधर्वैः पूज्यमानो दिवं व्रजेत्॥ अत्र दानमंत्रानित्यपक्रम्य॥ इत्या
मंत्रफले दानमंत्राः स्वावाहने॥ एवं लवणादिस्व पीतिमदनरत्ने॥ तत्र॥ अर्कतेजोनाधिकारः स्यादितिवदुपसंहारबाधा
त्॥ तेनामंत्रो क्तेत्यर्थः॥ दानवाक्यं तु॥ सर्वपापक्षयदीर्घायुः पुत्रपौत्रान्वितत्वदेवगंधर्वपूजापूर्वकस्वर्गगमनोत्तरपुन
रावृत्तिरहितविष्णुपदप्राप्तिकाम इति॥ अथ कार्पाससैलः॥ पाद्मे॥ कार्पासपर्वतस्तद्वद्विंशद्भारैरिहोत्तमः॥ दश
भिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः॥ भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः॥ धान्यपर्वतवत्सर्वमासाद्य
राजसत्तम॥ मंत्रस्तु॥ त्वमेवावरणायस्मा ल्लोकानामिह सर्वदा॥ कार्पासचलतस्मात्त्वमघौघध्वंसनो भव॥ रुद्रलो दान०
के वसेत्कल्पं ततो राजा भवेदिह॥ ब्रह्मांडे तु॥ सर्वधान्यसमृद्धस्य मध्ये द्रोषमिनिर्वृतं॥ रसैरत्नैश्च संयुक्तं लोकपाला २३१

व तं तथा॥ होमोप्याहुतिभिश्चैव श्रपयेत देवतैरपि॥ गंधेन सर्पिषानत्र तथा कुसुमतिलैरपि॥ अयुतं होमसंख्या च
पलाशासमिधस्तथा॥ नमः सर्वामरावास भूतसंचेर मिषुता॥ ब्रह्मादयो मे वरदा भवंतु विबुधाः सदैस्फलं॥ कल्पाव
धिरुद्रलोकवासोत्तरराजराजकाम इति वाक्यं॥ अथ घृताचलः॥ पाद्मे॥ विंशत्या घृतकुंभानामुत्तमस्यात्तु घृताचलः॥
मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृतः॥ अल्पवित्तः प्रकुर्वीत द्वाभ्यामिह विधानतः॥ पंचसहस्रस्तु कुंभः॥ विष्कंभपर्वतो
मद चतुर्भागेन कल्पयेत्॥ शालितंदुलपात्राणि कुंभोपरि निवेशयेत्॥ द्रवस्य घृतस्यस्व तः शैलाकारा यो गा॥ ताव
द्धृताधारपात्रकुंभः कारयेसंहृता सर्वान्यथाशोभविधानतः॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः॥ धान्यपर्व
तवत्केयं विधानमिह पठ्यते॥ अधिवासं च कुर्वीत तद्वद्धोमसुरार्चनं॥ मंत्रस्तु॥ संयोगाद्धृतमुत्पन्नं यस्मादमृततेजसा
॥ तस्माद्धृतार्चिर्विश्वात्मा प्रीयतामत्र शंकरः॥ यत्तु तेजोमयं ब्रह्म घृते तच्च व्यवस्थितं॥ घृतपर्वतरूपेण तस्मान्नः
पाहि भूधर॥ अनेन विधिना दद्याद्धृताचलमनुत्तमं॥ महापातकयुक्तोपि लोकमायाति शांकरं॥ विहरेत्पितृभिः सा
र्धं यावदाभूतसंप्लवं॥ दानवाक्यं तु॥ सर्वपापक्षयहंससारसयुक्तकिंकिणीयुतार्कवर्णविमानकरणकशिवलोक

Indira Gandhi National
Centre for the Arts

२३२ गमनोत्तरसिद्धविद्याधरार्चितलपितृयुतभूतसंप्लवावधिकविहरकामइति॥ अथरत्नाचलः॥ पाद्मे॥ अतःपरंप्रव
क्ष्यामिरत्नाचलमनुत्तमं॥ मुक्ताफलसहस्रेणपर्वतःस्यादिहोत्तमः॥ मध्यमःपंचशतिकस्त्रिशतेनाधमस्मृतः॥ चतुर्था
शेनविष्कंभपर्वताःस्युःसमंततः॥ पूर्वेणवज्रगोमेदैर्दक्षिणेनेंद्रनीलकैः॥ पुष्परागयुतैःकार्योविद्वद्भिर्गंधमादन
ः॥ वैडूर्यविद्रुमैःपश्चात्संमिश्रोविपुलाचलः॥ पद्मरागैःससौवर्णैरुत्तरेणतुविन्यसेत्॥ सुपार्श्वमितिशेषः॥ वज्र
गोमेदाःसमसंख्यांइतिहेमाद्रिः॥ त्रयस्तुयुक्ताः॥ सोपर्यौर्गारुत्मतैः॥ धान्यपर्वतवत्सर्वमत्रापिपरिकल्पयेत्॥ तद्वदा
वाहनंकुर्याद्वृक्षान्देवांश्चकांचनान्॥ दानमंत्रः॥ यथादेवगणाः सर्वेरत्नेष्ववस्थिताः॥ त्वंचरत्नमयोनि
त्यमतःपाहिमहाचल॥ यस्माद्रत्नप्रसादेनरविंप्रकुरुतेहरिः॥ महारत्नप्रदानेनतस्मान्नःपाहिसर्वतः॥ अने
नविधिनायस्तुकुर्याद्रत्नमहागिरिं॥ सयातिवैष्णवंलोकममरेश्वरपूजितः॥ यावत्कल्पशतंसाग्रंवसेदिहन
राधिप॥ रूपारोग्यगुणोपेतःसप्तद्वीपाधिपोभवेत्॥ दानवाक्यंतु॥ ब्रह्महत्यादिसर्वपापक्षयापरमेश्वरप्रजापूर्व राम०
कराग्रकल्पशतविष्णुलोकनिवासोत्तरसप्तद्वीपाधिपत्यकामइति॥ अथरूप्याचलः॥ पाद्मे॥ दशभिःपलसा २३२

हस्रैरुत्तमोरजताचलः॥ पंचभिर्मध्यमःप्रोक्तस्तदर्धेनाधमःस्मृतः॥ अशक्तोविंशतेरूर्ध्वंकारयेच्छक्तितःसदा॥ पूर्ववद्राज
तान्कुर्यान्मंदरादीन्विधानतः॥ पूर्ववत्तुरीयांशेन॥ ब्रह्मविष्णुशिवान्कुर्यान्नितंबोत्रहिरण्मयः॥ राजतंस्याद्यदन्येषांका
र्यंतदिहकांचनं॥ दानमंत्रः॥ पितृणांवल्लभंयस्माद्धरेंद्राशंकरस्यच॥ रजतंपाहितस्मान्नःशोकसंसारसागरात्॥ गवां
दशसहस्रस्यफलंप्राप्नोतिमानवः॥ सोमलोकेवसेद्धीमान्यावदाभूतसंप्लवं॥ सर्वपापक्षयदशसहस्रगोदानफलावाप्तिकिं
नरोप्सरोगणपूजाविशिष्टाभूतसंप्लवसोमलोकवासकामइतिदानवाक्यं॥ अथशर्कराचलः॥ पाद्मे॥ अष्टभिःशर्कराभा
रैरुत्तमस्यान्महाचलः॥ चतुर्भिर्मध्यमस्तद्वद्भाभ्यामप्यधमःस्मृतः॥ भारेणार्धभारेणकुर्याद्यःस्वल्पवित्तवान्॥ विष्कंभ
पर्वतान्कुर्यात्तुरीयांशेनमानवः॥ धान्यपर्वतवत्सर्वमासाद्यामरसंयुतं॥ वृक्षत्रयमुक्त्वोक्तं॥ हरिचंदनसंतानौपूर्वपश्चिमभा
गयोः॥ निवेश्यौसर्वशैलेषुविशेषाच्छर्कराचले॥ दानमंत्रस्तु॥ सौभाग्यामृतसारोयंपरमःशर्कराचलः॥ तस्मान्मानंदका
रीत्वंभवशैलेंद्रसर्वदा॥ अमृतंपिबतांयेतुनिपेतुर्भुविशीकराः॥ देवानांतत्समुत्थोयंपाहिनःशर्कराचल॥ मनोभवधनुर्म
ध्याद्धूताशर्करायतः॥ तन्मयोसिमहाशैलपाहिसंसारसागरात्॥ फलंतु॥ सर्वपापविनिर्मुक्तःप्रयातिशिवमंदिरं॥

Indira Gandhi National Centre for the Arts

इत्यादि॥ दानवाक्यं तु॥ सर्वपापक्षयपूर्वकरुद्रतोषनिजानुजीविसहितचंद्रादित्यसमविमानारोहणपूर्वकशिवमंदि
रगमनोत्तरविष्णुलोकनिवासेत्तरसप्तद्वीपाधिपत्योत्तरजन्मायुतत्रयारोग्यकामइति॥ शेषं प्राग्वत्॥ इति दशपर्वतदानं॥ ॥
अथ हेमाद्रौ द्वादशमेरुदानानि॥ कालोत्तरे॥ आकार्तिकासमारभ्य मेरुव्रतं समाचरेत्॥ कार्तिक्यां रत्नमेरुश्च दातव्यस्तु शिवाग्र
तः॥ सर्वेषां चैव मेरूणां प्रमाणां क्रमशः शृणु॥ वज्रपद्ममहानीलनीलस्फटिकसंज्ञकाः॥ पुष्पसागरमुक्ताश्च ग्राह्यास्तु विभवे
न तु॥ प्रस्थमात्रात्तु संग्राह्याः प्रस्थस्यार्धार्धमेव वा॥ यथाशक्त्याथवा देया वित्तशाठ्यविनासुत॥ कर्णिकायां न्यसेन्मेरुं
ब्रह्मविष्ण्वीशभूषितं॥ तस्य पूर्वेमाल्यवंतं च पर्वतं परिकल्पयेत्॥ तत्पूर्वे भद्रसंज्ञं तु अश्ववंतं ततः परं॥ मेरुः पर्वतदिग्भागे पूर्वेप
र्वतत्रयं॥ कथितं सविशेषेण दक्षिणाः स्यात्ततः परं॥ निषधो हेमकूटश्च हिमवांश्च तथा त्रयः॥ एवमुत्तरभागे तु नीलः
श्वेतश्च शृंगवान्॥ पश्चिमे गंधमादारस्य केतुर्वैकेतुमालकं॥ एवं द्वादशसंयुक्तं मेरुं पर्वतनायकं॥ सोपवासः शुचिर्भूत्वा
विशेषात्पूजयेच्छिवं॥ महास्नानं प्रकर्तव्यं महापूजा पवासुत॥ प्रज्ञाते देवदेवाग्रे तत्र मेरुं प्रकल्पयेत्॥ महास्नानं गोघृ 
तेनोक्तं लिंगे॥ स्नानं पलशतं ज्ञेयमभ्यंगः पंचविंशतिः॥ पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितं॥ स्नाप्य लिंगमदीपचगव्येन व 

घृतेन तु॥ अनुलेपनं वनच्छत्तं पंचविंशपलेन तु॥ दशाढ्यो तोस्तु नैवेद्यमष्टद्रोणं रथापि वेति॥ मेरोः प्रार्थनोक्ता कालोत्तरे॥ न
मः कांचनदेहाय धराधाराय वै नमः॥ ब्रह्मविष्ण्वीशशृंगाय धरामध्ये स्थिताय च॥ नगद्वादशनाथाय सर्वपापापहारिणे॥ शि
वत्रकायभद्राय यत्र शोमेरुसर्वदा॥ निःपापः पितृभिः सार्धं शिवं गच्छामि तु नमः॥ त्वं शिवस्त्वं शिवस्याग्रे शिवोहं च शि
वाय च॥ निवेदयामि भक्त्या च पितृणां तारणाय च॥ तथा॥ वस्त्राश्वसहितां मेरुं तत्र पुण्यफलं शृणु॥ लक्षयोजनमा
नस्य मेरोर्यत्परमाणवः॥ तावत्कल्पसहस्राणि शिवलोके महीयते॥ उद्धरेन्नरकात्सो पि त्रिःसप्तकुलसंततिं॥ महापात
किपितॄणां च लोकाप्तिः फलं॥ अथ हेममेरुः॥ तन्मानं तत्रैव॥ पलानां तु सहस्रेण मध्यमेरुं प्रकल्पयेत्॥ शृंगत्रयं समा
युक्तं ब्रह्मविष्णुहरान्वितं॥ एकैकं पर्वतं तस्य शतेनैकेन कारयेत्॥ अन्यत्प्राग्वत्॥ रत्नादौ रूप्यमेरुं च हेममानेन कार
येत्॥ पर्वता द्वादशैव तथा संकल्प्या रचनान्विताः॥ शेषं प्राग्वत्॥ भूमेरुः प्रमाणं तु कथ्यमानं शृणुष्व तत्॥ विषयं म
ण्डपं वा ग्रामं वा पर्वतं स्मरेत्॥ शेषास्तदष्टमांशेन नगाः स्युः विसंख्यया॥ दीयमानभूपरमाणुमितवर्षकोटिसहस्राव
धि शिवलोकप्राप्त्यनंतरराजराजत्वयोगिकुलोत्पत्तिपूर्वकतत्त्वज्ञानजन्यपुनर्जन्माभावः फलं॥ अन्यत्प्राग्वत्॥ अथ ग

Indira Gandhi National Centre for the Arts

२३५ जपर्वतः॥ हस्तिमेरुसमतोवस्येसंस्थेपासार्वतीसुतः॥ शूरंसर्वगुणोपेतंघंटाचामरभूषितं॥ नक्षत्रमालासंयुक्तंवस्त्रध्वज
विभूषितं॥ दिव्यवस्त्रसमायुक्तंसुवर्णरचनायुतं॥ सूर्यस्यग्रहणेदेयंगुरवेतंशिवाग्रतः॥ तेनदत्तेनदत्तंतुसयोजनपर्वतं
॥पुरुषत्रयसंयुक्तंपर्वतद्वादशान्वितं॥ मध्येएकोगजःद्वादशपर्वतायीइतित्रयोदशगजाः॥ केचित्अश्वपर्वतवन्मध्ये
पंचगजानाहुः॥ तदासप्तदशामुच्यतेसर्वपापेभ्यः शिवसायुज्यताव्रजेत्॥ पितरस्तस्यमोदंतेशिवलोकेसमंततः॥ अ
थप्राग्वत्॥ अथाश्वपर्वतः॥ अथाश्वमेरुर्वीदेयोयोदत्तोरविणापुरा॥ श्वेतैर्विनीतैःसदशैःप्रसन्नैःपंचसंख्यया
॥मध्येमेरुःकल्पितव्योरविसंख्याश्चपर्वताः॥ सवस्त्रहेमपद्माश्वसप्तयाधजभूषिताः॥ वेधारव्याणायकार्त्तिक्यांदा
तव्यश्चशिवाग्रतः॥ संपूज्यपरयाभक्त्याहेमकंकणकुंडलैः॥ अश्वमेरुप्रदानेनरुद्रलोकेम[illegible]पते॥ अश्वाभावेस्वरिद्रश्च
गोमेरुंपरिकल्पयेत्॥ अश्वसंख्याप्रमाणेनफलंचैतत्समंभवेत्॥ अथयावास्तमेरुश्चदानंयश्चशिवाग्रतः॥ धारमात्रे
णपदेस्तुनानानर्गोस्तपर्वताः॥ मध्येमेरुःकल्पनीयोवस्त्रेशेषाश्चकल्पयेत्॥ प्रत्येकंपर्वताःकल्प्याहेमशृंगाःसुवर्णि राम०
काः॥ दिव्यंवर्षशतंसम्यककुर्याभोगंयथेप्सया॥ चक्रवर्त्तित्वमभ्येतिदत्तानवानजायतेततः॥ शिवालयंततोयातिनभ्र २३५

योजन्मचाप्नुयात्॥ अथवाघृतमेरुश्चरातथ्याःकथ्यतेधुना॥ मेरुःपलानांमध्येतुसहस्रैःपंचभिर्द्दितः॥ शतैःपं
चभिरेकैकंपर्वतंतत्रकल्पयेत्॥ त्रिशृंगंत्रिपलंमेरोःकांचनंदेवतार्चनं॥ एकैकपलिकेशेषपर्वतेवस्त्रभूषिते॥ कृत्वाप्र
जांविशेषेणशिवस्याग्रेप्रकल्पयेत्॥ कुलमुद्धरतेसोपिपैतृकंमातृकंतथा॥ दिव्यवर्षशतंसाग्रंरुद्रलोकेमहीयते॥ ए
वंवैखंडमेरुंतुसितखंडेनकल्पयेत्॥ रुद्रलोकपदंयातिपितृभिःसहमोदते॥ अथयाधान्यमेरुंतुशिवस्याग्रेप्रकल्पये
त्॥ पंचखारीमितंमध्येमेरुंधान्येनकल्पयेत्॥ खारीतुद्रोणैःषोडशभिःखारीविंशत्याकुंभनुच्यतेइष्टका॥
एकैकंखारीमात्रेणपर्वतंशेषमादिशेत्॥ पूर्ववद्धेमशृंगंतुसवस्त्रंपरिकल्पयेत्॥ कल्पकोटिसहस्राणिशिव
लोकेमहीयते॥ एतद्दशांशमानेनतिलमेरुंप्रकल्पयेत्॥ शृंगाणिपूर्ववत्तस्यतथाचान्यन्गेषुच॥ प्रयातिशि
वसायुज्यंबंधुभिःसहितोनरः॥ दशकोटिसहस्राणिभुक्त्वाभोगान्यथेच्छया॥ समस्तमेदिनीभुक्तेपृथिवीप
श्चात्प्रलीयते॥ इतिद्वादशसंख्याताःपर्वताःकथितास्तव॥ मेरुप्रदानंकर्त्तव्यमुपोष्यसुदिनेसदा॥ इतिद्वा
दशमेरुदानं॥ हेमाद्रौविस्तुधर्मे॥ भूपएवमहाबाहोशृणुदानंमहाफलं॥ यद्दत्वापुरुषोराजन्नेहसंजायते

Indira Gandhi National Centre for the Arts

२३६ पुनः॥मेरुर्हेममयश्चैवत्रिंशगोरा ज्ञेयो पिवा॥पलत्रयेणासौ वर्णो विंशत्ताराजतः पश्चैः॥ताम्रः पंचशता प्रोक्तः पला
नां कांस्यकस्तथा॥लोहस्य भारमात्रस्तु सीसकस्यं तथास्मृतः॥लवणस्याप्येवमेव व्रीहीणामेवमेव च॥भा
रद्वयेन खांडस्तु गोडः स्यात्सच भारकः॥कास्तूरिकः पंचपलः कार्पूरः पंचविंशतिः।कौंकुमः स्याच्छतपलः
कार्पासः षट्त्रिंशभारकः॥एवं द्रव्यविशेषैस्तु मेरुः कार्यो विजानता॥कृत्वा मेरुं त्रिशृंगं तु सौवर्णं राजतादि
कं॥अर्चयेत्तीन कुसुमैर्जागरं कल्पयेत्ततः॥मेरुं पर्वतराजं तु गृहाण त्वं द्विजोत्तम॥ममानुकंपया ब्रह्मन्व
रदः प्रीयतामिति॥कोदादिति तु मंत्रेणाग्रहः कार्यो विजानता॥मेरुं समर्प्य विप्राय द्रव्येणास्वेच्छयान्वि
तं॥तावद्वर्षसहस्राणि कोटिं वापि महीयते॥वसति स्वर्गलोके तु यावदिंद्राश्चतुर्दश॥ ॥इति ना
नापर्वतदानानि॥अथ शिखरदानं॥हेमाद्रौ॥ ॥विष्णुधर्मे॥माघशुक्ल॥तृतीयायां मार्गशीर्ष
स्य वा पुनः॥तृतीयायां वैशाखशुक्लायां रोहिणी युता॥प्रोष्ठपद्यां तृतीयायां विशेषेण तु भार्गव॥ राम०
गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्कराः॥खर्जूरतंडुलद्राक्षाक्षौद्रैर्मालयजेन वा॥फलैर्मनोहरै रम्यैः शिख २३६

राणि प्रकल्पयेत्॥एषामन्यतमं द्रव्यं यथाश्रद्धं विधानतः॥आत्मप्रमाणं कुर्वीत भारेणाभ्यधिकं शुभं॥मुविगो
मयलिप्तायां भित्तिरुपेत्य सस्तरेत्॥द्विहस्तमूलं कर्तव्यं हस्तमात्रं शिरस्तथा॥भित्तिरिक्षुदलैः कार्या वेष्टयेद्रक्तवास
सा॥मूले द्विहस्तांतरालामुपरि हस्तमात्रं प्रादेशाधिकस्य परीरोद्वा॥चतुरस्रेषु भित्तिष्वंतरे रक्तवस्त्रेणावेष्ट
यदितिमदनत बहिर्वेष्टनं तु शुक्लं॥दानद्रव्येणान्नं च पूरयेद्गुणेन॥इक्षुपत्रकुटे गौरीं तस्योपरि निवेशयेत्॥च
तुर्भुजां हेममयीं पूजयेत्कुंकुमेन तु॥इक्षुपत्रैः कूटरूपोपरि न्यसेत्तत्र गौरीं न्यसेत्॥गौरीं तु देवीं पु०॥गौरीशं
खं दुर्वर्णाभां शर्वरीशानिवेषितां॥रक्तपद्मासनासीनां साक्षसूत्रकमंडलुं॥वरदाभयहस्तां च ध्यात्वा सर्वमाल्यफ
लप्रियां॥वेष्टयेत्सूक्ष्मवस्त्रेण देवीशिखरमेव च॥अर्घांगपूजयेद्गौरीमंत्रैरेतैः सुभक्तितः॥नमो भवान्यै पा
दौ तु कामिन्यै जानुनी नमः॥वामदेव्यै तथा चोरू नाभिं चैव जगत्प्रियै॥आनंदायै तु हृदयं नं रायै पूजयेत्स्तनौ॥
सुभद्रायै सुखं पूज्य ललितायै नमो नमः॥शिरः॥अथ क्रमः॥उक्ते काले कर्ता कुशतिलयवजलहस्तो देशा
कालौ संकीर्त्य दौर्भाग्यरोगत्वाभावककल्पकोटिशततत्पकाल गौरीभवननिवासोत्तर पृथिवीपतित्वकामः।

२३७ न्वा गुडादिशिखरदानेन करिष्ये इति संकल्प्य गणेशादिपूजां पुण्याहवाचनं वृद्धिश्राद्धं च कृत्वा चार्यं वृत्वा पूर्वोक्तं शिखरं कृत्वा
गुडादेरुपरि परीक्षुपत्रकं निधाय तत्र सोमादिवस्त्रे हैमीं गौरीं निधाय शिखरं गौरीं च सूक्ष्मवाससाच्छाद्य गौरीमि
मां वेत्यावाह्य प्रतिष्ठाप्य पाद्यादि कुंकुमगंधवस्त्राद्यैः संपूज्य ओं भवान्यै नमः पाद्यं पूजयामीत्याद्युपचारैः संपूज्य तेन
नां पुष्पांजलिमादाय विप्रः प्रदक्षिणीकृत्य मंत्रयेत्॥ तद्यथा॥ एवं पूज्य महादेवीं शिखरं चाभिमंत्रयेत्॥ यस्मान्नि
त्यं पार्वत्याः शिखरं त्वं शिरेवं ततः॥ तस्मान्मां पाहि भगवंस्त्वं गौरीशिखरः सदा॥ इति पुष्पांजलिं प्रक्षिप्य रात्रौ
जागरणं कृत्वा प्रभाते रघात्॥ एवं मामंत्र शिखरं ततो यायां यतव्रतः॥ ततः स्नात्वा प्रभाते तु देधान्यं ने राभ
क्तितः॥ देशकालादि पूर्वोक्तफलोल्लेखांते मुकदं अमगुडादिनिर्मितं शिखरं अमुकगोत्रायामुकशर्मणे गुरवे
र्धं चतुर्थं पंचमं वा भागमेव शिष्यमन्येभ्यो बंधुशिष्यजनादिभ्यः संप्रददे न मम इति दत्त्वा जलं दत्त्वा पठेत्॥
यस्मात्त्वं सर्वभूतानामुपरिष्टाद्व्यवस्थितः॥ तस्माच्छिवः प्रीयतां मे तव दानेन सर्वदेति॥ स च ओं स्वस्तीदेव राम ०
स्य त्वेत्यादि सोमाय वासः॥ उत्तानायामित्यादि गुडं तेवामृतत्वमित्यादिका मत्स्यकृतिं च पठेत्॥ ततः कृतेतद्दान २३

२३८ तिष्ठार्थमिदं सुवर्णं दक्षिणां तुभ्यं संप्रददे इति दत्त्वान्येभ्योपि दत्त्वा मुक्तकेशो मौनी क्षीरं घृतं वा भुंजीत॥ तदुक्तं॥
अर्धभागं चतुर्थं वा पंचमं वा ततो गुरोः॥ दद्याच्छेषं तु बंधूनां शिष्याणां स्वजनस्य च॥ एवं दत्त्वा तु शिखरं गौर्या
भुंजीत वाग्यतः॥ समुक्तकेशः संप्राश्य क्षीरं घृतमथापि वा॥ सवसे द्विजनेरुद्धाः कल्पकोटिशतत्रयं॥ पुण्यक्षया
दिहायातो जायते पृथिवीपतिः॥ ॥इति नराहरुनारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृ
ते दानकमलाकरे पर्वतदानानि॥

५.३०

Indira Gandhi National
Centre for the Arts

पं. 30

Indira Gandhi National
Centre for the Arts